# Shri Ranganayika Stotram

# શ્રીરઙ્ગનાયિકાસ્તોત્રમ્

## Document Information

Text title : Shri Ranganayika Stotram 08 20

File name : ranganAyikAstotram.itx

Category : devii, devI, stotra

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-20

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# શ્રીરઙ્ગનાયિકાસ્તોત્રમ્

ઈશાનાં વરદાં સમસ્તજગતાં પદ્માસનસ્થાં શ્રિયં
પદ્માલઙ્કૃતપાણિપલ્લવયુગાં શ્રીરઙ્ગિણઃ પ્રેયસીમ્ ।
વાત્સલ્યાદિગુણોજ્જ્વલાં મણિમયર્ભૂષાગણૈર્ભૂષિતાં
અસ્મન્માતરમબ્જકાન્તવદનાં વન્દે જગન્માતરમ્ ॥ ૧॥

સ્વસ્તિ શ્રીર્દિશ મે શશાઙ્કવદને કલ્યાણદે વત્સલે
સર્વેષાં કિલ રઙ્ગનાથદયિતે તત્ક્ષાન્તિસંવર્ધકે ।
સન્ત્યક્તે નિવહૈઃ સતામશરણે તાપત્રયીબાધિતે
પાપિષ્ઠે મયિ દુર્મતૌ તવ કૃપા કાર્યેત્યહં પ્રાર્થયે ॥ ૨॥

અસ્મન્માતઃ શ્રુતીનાં શિરસિ વિલસિતે વત્સલે સિન્ધુકન્યે
કાન્તે શ્રીરઙ્ગરાજઃ કુવલયનયને સર્વલોકાધિરાજઃ ।
ઈશાને લોકમાતઃ સરસિજવદને દીપ્રગાત્રે સુશીલે
પદ્મે ત્વં પાહિ દીનં ભવજલધિગતં દુર્મતિં દુર્દશં મામ્ ॥ ૩॥

દુર્વૃત્તં દુર્મનીષં ભવજલધિગતં વિષ્ણુભક્તાપરાધૈ-
ર્વાગ્ગાત્રસ્વાન્તજન્યૈર્ભરિતમશરણં ગર્હિતં સર્વલોકૈઃ ।
નિત્યં મૂર્ખં નૃશંસં મદનપરવશં મોહવશ્યપ્રવશ્યં
દુઃખાબ્ધૌ મજ્જિતં માં સપદિ હિ કમલે પાહિ માતઃ પ્રસીદ ॥ ૪॥

શ્રીરઙ્ગનાથદયિતેઽખિલલોકમાતઃ
કાર્યા કૃપા હ્યશરણે મયિ સિન્ધકન્યે ।
વાત્સલ્યતસ્તુ કમલે મમ દિવ્યબોધં
દેહિ ત્વમેવ શરણં ભવ દિવ્યસૌખ્યમ્ ॥ ૫॥

સૌખ્યં પ્રદેહિ સુભગે દયિતે મુરારેઃ
શ્રીરઙ્ગિણઃ ખલુ રમે સુલભે સુશીલે ।
કાન્તસ્મિતે શશિલસદ્વદને દયાં તે
નિત્યં કુરુષ્વ મયિ માં પરિપાહિ પઝે ॥ ૬॥

કમલે કમલારુણદિવ્યમુખે
　　સુખદે જગતાં ખલુ કલ્પલતે ।
અયિ મામવલોકય સિન્ધુસુતે
　　કૃપયા તવ કેવલમજપદે ॥ ૭॥

પતિતં ભવવારિધિમભ્યગતં
　　સતતં વિમતં જનતાભિમતે ।
અયિ મામવલોકય પદ્મકરે
　　દયિતે જગદીશ્વરિ રઙ્ગપતેઃ ॥ ૮॥

પદયોઃ શરણાગતમબ્ધિસુતે
　　તવ દીનમકિઞ્ચનમાર્તિયુતમ્ ।
અયિ મામવલોકય રઙ્ગપતે
　　દયિતે વિધિશઙ્કરમુખ્યપતેઃ ॥ ૯॥

અપિ દુઃસહપાપશતૈર્ભરિતં
　　જગતાં જનનિ ક્ષમયા કમલે ।
પરિપાલય માં દયનીયમિમં
　　પરિદીનહૃદં તવ રઙ્ગપતેઃ ॥ ૧૦॥

યુવયોરપિ દુઃસહપાપશતૈ-
　　ર્ભુવનેશ્વરિ રઙ્ગપતેર્દયિતે ।
અપિ માં ભરિતં પરિપાલય તે
　　દયયા શરણાગતિકં પદયોઃ ॥ ૧૧॥

માતઃ પ્રસીદ કમલે જગતાં સુશીલે
　　તાપત્રયીજનિતદુઃખસહસ્રસઙ્ઘૈઃ ।
પાપૈરનન્યગતિકં ભરિતં ચ દીનં
　　માં રક્ષ દિવ્યકૃપયા શરણાગતં ત્વામ્ ॥ ૧૨॥

યુષ્મત્પદામ્બુજયુગં શરણં ગતસ્ય
　　માતઃ પ્રયચ્છ વરદે જગતાં પ્રિયં મે ।
શ્રીરઙ્ગનાયકિ મનોહરદિવ્યરૂપે
　　પાહિ પ્રસીદ કમલે સુભગે સુશીલે ॥ ૧૩॥

ભવસિન્ધુમગ્નમરવિન્દલોચને

પ્રણતપ્રસન્નમુખચન્દ્રમણ્ડલે ।
પરિપાલયાદ્ય દયનીયદુર્દશં
કૃપયા ચ માં ચ કમલે દયાનિધે ॥ ૧૪॥

તવ રઙ્ગિણશ્ચ ચરણામ્બુજે વિના
ગતિરસ્તિ નો ચ મમ રઙ્ગનાયકિ ।
ઇહ માં કુરુષ્વ તવ કિઙ્કરં સદા
જનની સમસ્ત જગતાં દયાનિધે ॥ ૧૫॥

વિધિશઙ્કરેન્દ્રમુખનિર્જરૈઃ સદા
વનિતાયુતશ્ચ કમલે સમર્ચિતે ।
અખિલેષ્ટદે સકલલોકવલ્લભે
સતતં કુરુષ્વ તવ કિઙ્કરં તુ મામ્ ॥ ૧૬॥

જનની મમ ત્વમસિ સિન્ધુકન્યકે
શરણં ત્વમેવ કમલે દયાનિધે ।
ઇહ નિસ્તરેયમહમબ્જલોચને
કૃપયા તવૈવ ભવઘોરસાગરમ્ ॥ ૧૭॥

માતઃ શ્રીઃ સિન્ધુકન્યે કુવલયશફરીપદ્મસૌગન્ધિકાદિ-
પ્રસ્પર્ધિસ્ફારનેત્રે સરસિજવદને દિવ્યલાવણ્યગાત્રે ।
બિમ્બશ્રીવિદ્રુમાભાધરરુચિલસિતે દિવ્યવક્ષોજદીપ્રે
પદ્મે (રક્ષ) શ્રીરઙ્ગહર્મ્યાઙ્ગણકનકલતે
ત્વત્કટાક્ષૈઃ શુભૈર્મામ્ ॥ ૧૮॥

માં રક્ષ રઙ્ગિદયિતે મધુરૈઃ કટાક્ષૈઃ
રાભોગતુઙ્ગરુચિરસ્તનભાસમાને ।
સર્વેશ્વરસ્તવ સુદર્શનલોલદૃષ્ટિ-
સ્ત્વાં વીક્ષતે તવ પતિઃ સતતં સુશીલે ॥ ૧૯॥

સમજજતિ સ્તનતટે તવ રઙ્ગનાથો
વ્યામુગ્ધવાંસ્ત્વયિ શુભે ઝષમુગ્ધનેત્રે ।
વશ્યઃ સદા ભવતિ તે કમલે તતસ્ત્વં
માં રક્ષ રઙ્ગિદયિતે કરુણાકટાક્ષૈઃ ॥ ૨૦॥

ઈષત્પ્રફુલ્લકમલોત્પલકાન્તનેત્રે
મુગ્ધસ્મિતપ્રવિલસદ્વદનારવિન્દે ।

શ્રીરઙ્ગનાયકિ મનોહરદિવ્યગાત્રે
    નિત્યં પ્રસીદ મમ વૃત્તમચિન્તયિત્વા ॥ ૨૧॥

શ્રીરઙ્ગરાજસયુજે શ્રિયૈ કનકભૂષણૈઃ ।
માણિક્યભૂષણૈર્દીપ્રતન્વઙ્ગથૈ જયમઙ્ગલમ્ ॥ ૨૨॥

ઇતિ શ્રીરઙ્ગનાયિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

---

*Shri Ranganayika Stotram*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*